मुकुन्दमुक्तावली

श्रीव्रजनागराय नमः

नवजलधवर्णं चम्पकोद्भासिकर्णं
विकसितनलिनास्यं विस्फुरन्मन्दहास्यम् ।
कनकरुचिदुकूलं चारुबर्हावचूलं
कमपि निखिलसारं नौमि गोपकुमारम् ॥१ ॥

मुखजितशरदिन्दुः केल्लावण्यसिन्धुः
करविन्हितकन्दुर्वल्लवीप्राणबन्धुः ।
वपुरुपसृतरेणुः कक्षनिक्षिप्तवेणु-
र्वचनवशगधेनुः पातु मां नन्दसूनुः ॥२ ॥
मालिनी

ध्वस्तदुष्टशङ्खचूड वल्लवीकुलोपगूढ
भतमानसाधिरूढ नीलकण्ठपिञ्छचूड ।
कण्ठलम्बिमञ्जुगुञ्ज केलिलब्धरम्यकुञ्ज
कर्णवर्तिफुल्लकुन्द पाहि देव मां मुकुन्द ॥३ ॥

यज्ञभङ्गरोष्टशत्रुनुन्नघोरमेघचक्र
वृष्टिपुरखिन्नगोपवीक्षणोपजातकोप ।
क्षिप्रसव्यहस्तपद्मधारितोच्चशैलसद्म
गुप्तगोष्ठ रक्ष रक्ष मां तथाद्य पङ्कजाक्ष ॥४ ॥
चित्रा

मुक्ताहारं दधदुडुचक्राकारं
सारं गोपीमनसि मनोजारोपी ।
कोपी कंसे खलनिकुरम्बोत्तंसे
वंशे रङ्गी दिशतु नः शार्ङ्गी ॥५॥

लीलोद्दामा जलधरमालाश्यामा
क्षामाः कामादभिरचयन्ती रामाः ।
सा मामव्यादखिलमुनीनां स्तव्या
गव्यापूर्तिः प्रभुरघशत्रोर्मूर्तिः ॥६॥
जलधरमाला

पर्ववर्तुलशर्वरीपतिगर्वरीतिहराननं
नन्दनन्दनमिन्दिराकृतवन्दनं धृतचन्दनम् ।
सुन्दरीरतमन्दिरीकृतकन्धरं धृतमन्दरं
कुण्डलद्युतिमण्डलप्लुतकन्धरं भज सुन्दरम् ॥७॥

गोकुलाङ्गनमण्डनं कृतपूतनाभवमोचनं
कुन्दसुन्दरदन्तमम्बुजवृन्दवन्दितलोचनम् ।
सौरभाकरफुल्लपुष्करविस्फुरत्करपल्लवं
दैवतव्रजदुर्लभं भज वल्लवीकुलवल्लभम् ॥८॥
रङ्गिनी

तुण्डकान्तिदण्डितोरुपाण्डुरांशुमण्डलं
गण्डपालिताण्डबालिशालिरत्नकुण्डलम् ।
फुल्लपुण्डरीकषण्डक्ऌप्तमाल्यमण्डनं
चण्डबाहुदण्डमत्र नौमि कंसखण्डनम् ॥९॥

उत्तरङ्गदङ्गरागसङ्गमातिपिङ्गल-
स्तुङ्गशृङ्गसङ्गिपाणिरङ्गनातिमङ्गलः ।
दिग्विलासिमल्लिहासि कीर्तिवल्लिपल्लव-
स्त्वां स पातु फुल्लचारु चिल्लिरद्य वल्लवः ॥१० ॥
तूणकम्

इन्द्रनिवारं व्रजपतिवारं
निर्धुतवारं हृतघनवारम् ।
रक्षितगोत्रं प्रीणितगोत्रं
त्वां धृतगोत्रं नौमि सगोत्रम् ॥११ ॥

कंसमहीपतिहृद्गतशूलं
सन्ततसेवितयामुनकूलम् ।
वन्दे सुन्दरचन्द्रकचूलं
त्वामहमखिलचराचरमूलम् ॥१२ ॥

मलयजरुचिरस्तनुजितमुदिरः
पालितविधुस्तोषितवसुधः ।
मामतिरसिकः केलिभिरधिकः
सितसुभगरदः कृपयतु वरदः ॥१३ ॥

उररीकृतमुररीरुतभङ्गं
नवजलधरकिरणोल्लसदङ्गम् ।
युवतिहृदयधृतमदनतरङ्गं
प्रणमत यामुनतटकृतरङ्गम् ॥१४ ॥

पज्झटिका

नवाम्भोदनीलं जगत्तोषशीलं
मुखासङ्गिवंशं शिखण्डावतंसम्।
करालम्बिवेत्रं वराम्भोजनेत्रं
धृतस्फीतगुञ्जं भजे लब्धकुञ्जम्॥१५॥

हृतक्षौणिभारं कृतक्लेशहारं
जगद्गीतसारं महारत्नहारम्।
मृदुश्यामकेशं लसद्वन्यवेशं
कृपाभिर्निदेशं भजे वल्लवेशम्॥१६॥
भुजङ्गप्रयातम्

उल्लसद्वल्लवीवाससां तस्कर-
स्तेजसा निर्जितप्रस्फुरद्भास्करः।
पीनदोःस्तम्भयोरुल्लसच्चन्दनः
पातु वः सर्वतो देवकीनन्दनः॥१७॥

संसृतेस्तारकं तं गवां चारकं
वेणुना मण्डितं क्रीडने पण्डितम्।
धातुभिर्वेषिणं दानवद्वेषिणं
चिन्तय स्वामिनं वल्लवीकामिनम्॥१८॥
स्रग्विणी

उपात्तकवलं परागशबलं
सदेकशरणं सरोजचरणम्।

अरिष्टदलनं विकृष्टललनं
नमामि समहं सदैव तमहम् ॥१९॥

विहारसदनं मनोज्ञरदनं
प्रणीतमदनं शशाङ्कवदनम् ।
उरःस्थकमलं यशोभिरमलं
करात्तकमलं भजस्व तमलम् ॥२०॥
जलोद्धतगतिः

दुष्टध्वंसः कर्णिकारावतंसः
खेलद्वंशी पञ्चमध्वानशंसी ।
गोपीचेतःकेलिभङ्गिनिकेतः
पातु स्वैरी हन्त वः कंसवैरी ॥२१॥

वृन्दाटव्यां केलिमानन्दनव्यां
कुर्वन्नारीचित्तकन्दर्पधारी ।
नर्मोद्गारी मां दुकूलापहारी
नीपारूढः पातु बर्हावचूडः ॥२२॥
शालिनी

रुचिरनखे रचय सखे
वलितरतिं भजनततिम् ।
त्वमविरतिस्त्वरितगति-
र्नतशरणे हरिचरणे ॥२३॥

रुचिरपटः पुलिननटः

पशुपगतिर्गुणवसतिः ।
स मम शुचिर्जलदरुचि-
र्मनसि परिष्कुरतु हरिः ॥२४ ॥
त्वरितगतिः

केलिविहितयमुलार्जुनभञ्जन
सुललितचरितनिखिलजनरञ्जन ।
लोचननर्तनजितचलखञ्जन
मां परिपालय कालियगञ्जन ॥२५ ॥

भुवनविसृत्वरमहिमाडम्बर
विरचितनिखिलखलोत्करसंवर ।
वितर यशोदातनय वरं वर-
मभिलषितं मे धृतपीताम्बर ॥२६ ॥

चिकुरकरम्बित चारुशिखण्डं
भालविनिर्जितवरशशिखण्डम् ।
रदरुचिर्निर्धूतमुद्रितकुन्दं
कुरुत बुधा हृदि सपदि मुकुन्दम् ॥२७ ॥

यः परिरक्षितसुरभीलक्ष-
स्तदपि च सुरभीमर्दनदक्षः ।
मुरलीवादनखुरलीशाली
स दिशतु कुशलं तव वनमाली ॥२८ ॥
पज्झटिका

रमितनिखिलडिम्बे वेणुपीतोष्ठबिम्बे
हतखलनिकुरम्बे वल्लवीदत्तचुम्बे ।
भवतु महितनन्दे तत्र वः केलिकन्दे
जगदविरलतुन्दे भक्तिरुर्वी मुकुन्दे ॥२९॥

पशुपयुवतीगोष्ठीचुम्बितश्रीमदोष्ठी
स्मरतरलितदृष्टिर्निर्मितानन्दवृष्टिः ।
नवजलधरधामा पातु वःकृष्णनामा
भुवनमधुरवेशा मालिनी मुक्तिरेषा ॥३०॥
मालिनी